# Vishvakarmakrita Jaganmata Stuti

# विश्वकर्मकृता जगन्मातास्तुतिः

## Document Information

Text title : Vishvakarmakrita Jaganmata Stuti

File name : jaganmAtAstutiHvishvakarmakRRitA.itx

Category : devii, gaNeshapurANa, stuti

Location : doc_devii

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 95 | 2.95 5-15||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# विश्वकर्मकृता जगन्मातास्तुतिः

विश्वकर्मोवाच ।
नमामि विश्वेश्वरि ! विश्वरूपे ! ब्रह्मेन्द्ररुद्रार्यमविष्णुरूपे ! ।
त्वया ततं विश्वमनन्तशक्ते ब्रह्मादिदेवैरभिनन्द्यरूपे ! ॥ ५॥

त्वमेव विश्वं रजसा विधत्से सत्त्वेन मातः परिपासि तच्च ।
त्वमेव सर्वं तमसाऽथ हंसि त्रैगुण्यमेतत् तव नित्यरूपम् ॥ ६॥

त्वया हता दैत्यगणा विमुक्तिं ब्रह्मर्षयो ज्ञानबलात् प्रपन्नाः ।
त्वमेव विष्णोरतुलाऽसि शक्तिः सर्वस्य हेतुः परमाऽसि माया ॥ ७॥

सतोऽसतो याऽपि परासि शक्तिश्चराचरं त्वं विदधासि विश्वम् ।
सम्मोह्य लोकान् सकलान् सुरेशान् काष्ठाकलाभिश्च ददासि भोगम् ॥ ८॥

ये त्वां प्रपन्ना न भयन्तु तेषां मृत्योस्तस्था दैत्यकृतं कदाचित् ॥ ९॥

त्वमेव लक्ष्मीः सुकृतामलक्ष्मीर्दुष्टात्मनां त्वं प्रमदास्वरूपा ।
विद्यास्वरूपासि जगत्त्रये त्वं प्रभास्वरूपा शशिसूर्ययोत्स्वम् ॥ १०॥

य आश्रितास्ते जगदाश्रयास्ते विपत्तिलेशो न च तेषु मातः ! ।
त्वमेव विश्वेश्वरि ! विश्वमेतद्धरस्यथाप्यायसि वारिरूपा ॥ ११॥

अनादिमध्याऽनिधनाप्यगम्या हरीशलोकेशसुरेश्वराणाम् ।
तेऽनुग्रहात् त्वां प्रभजन्ति भक्ता आनन्दरूपा निवसन्ति नाके ॥ १२॥

अभक्तिकामान् विनिहंसि रुष्टा त्वामेव मातः ! शरणं प्रपन्नः ।
धन्ये ममैते नयनेऽथ विद्या जनुश्च माता पितृवंश एव ॥ १३॥

कुलं चधन्यं चरणौ त्वदीयौ दृष्टौ यतस्ते जगदम्बिके ! मया ।
फलश्रुतिः -
क उवाच ।
एवं स्तुता जगन्माता वरमस्मै न्यवेदयत् ॥ १४॥

स वव्रे परमां भक्तिं सात तथेति तमब्रवीत् ।
इदं स्तोत्रं पठेद् यस्तु सर्वान् कामाँल्लभेच्च सः ॥ १५॥

सर्वत्र विजयं पुष्टिं विद्यामायुः सुखं शिवम् ।

इति विश्वकर्मकृता जगन्मातास्तुतिः सम्पूर्णा ॥

- ॥ श्रीगणेशपुराणं क्रीडा (उत्तर)खण्डः । अध्यायः ९५ । २.९५ ५-१५॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 95 . 2.95 5-15..

Proofread by Preeti Bhandare

*Vishvakarmakrita Jaganmata Stuti*
pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*